| 3 | TYBA (Shastri) | **RAJYAGURU HITESHKUMAR NITINBHAI**<br>Aanandbava Vedant Sanskrit Mahavidyalaya, Dhorivav | 79.22 | Distinction | NAVYA VYAKRAN |
| 1 | MA-2 (Acharya) | **DAVE NITIN LABHSHANKARBHAI**<br>P.G. Department, S S S U, Veraval | 80.88 | Distinction | SHUKLA YAJURVED |
| 2 | MA-2 (Acharya) | **JANI KARTIKKUMAR NANDLALBHAI**<br>P.G. Department, S S S U, Veraval | 80.75 | Distinction | SHUKLA YAJURVED |
| 3 | MA-2 (Acharya) | **JANI SWASTIK HASMUKHBHAI**<br>Darshanam Sanskrit Mahavidyalaya, Chharodi | 78.71 | Distinction | NAVYA VYAKRAN |
| 1. | B.Ed. (Sikshashastry) | **SHILU BHARATKUMAR AMRUTLAL**<br>Shree Bhagvat Vidyapeetha Sikshashastri (B.Ed.) Mahavidyalaya, Sola | 88.94 | Distinction | Gujarati Method |
| 2 | B.Ed. (Sikshashastry) | **JOSHI HIREN JADAVBHAI**<br>Shree Bhagvat Vidyapeetha Sikshashastri (B.Ed.) Mahavidyalaya, Sola | 88.89 | Distinction | Gujarati Method |
| 3 | B.Ed. (Sikshashastry) | **JANI NARESHKUMAR HIMMATLAL**<br>Shree Bhagvat Vidyapeetha Sikshashastri (B.Ed.) Mahavidyalaya, Sola | 87.17 | Distinction | Gujarati Method |
| 1 | P.G.D.C.A. | **AGRAWAT HEMAXI GORDHANBHAI**<br>P.G. Department, S S S U, Veraval | 84.91 | First Class With Distinction | – |
| 2 | P.G.D.C.A. | **JANI NIDHI RAMESHBHAI**<br>P.G. Department, S S S U, Veraval | 82.55 | First Class With Distinction | – |
| 3 | P.G.D.C.A. | **ZINIYA JIGNASA RAVJIBHAI**<br>P.G. Department, S S S U, Veraval | 82.55 | First Class With Distinction | – |

## Subject Wise Toppers of Acharya Class
## Shree Somnath Sanskrit University List
## APRIL-2015

| Rank | Class | Subject | Student's Name<br>College Name | Percentage | Garde |
|---|---|---|---|---|---|
| 1 | MA-2 (Acharya) | FALITA-JYOTISHA | **JANI KRISHNAKUMAR GHANSHYAMBHAI**<br>Brahmarshi Sanskrit Mahavidyalaya, Nadiad | 73.29 | Distinction |
| 2 | MA-2 (Acharya) | FALITA-JYOTISHA | **JOSHI UTSAV HARESHCHANDRA**<br>Sarayu Ramanand Sanskrit Mahavidyalaya, Ahmedabad | 71.21 | Distinction |
| 3 | MA-2 (Acharya) | FALITA-JYOTISHA | **JANI CHAITANYA SHIVSHANKAR**<br>Ram Janaki Sanskrit Mahavidyalaya, Ahmedabad | 69.75 | First Class |
| 1 | MA-2 (Acharya) | NAVYA-NYAYA | **JOSHI VISHAL HITESHBHAI**<br>Darshanam Sanskrit Mahavidyalaya, Chharodi | 75.00 | Distinction |
| 1 | MA-2 (Acharya) | NAVYA-VYAKARANA | **JANI SWASTIK HASMUKHBHAI**<br>Darshanam Sanskrit Mahavidyalaya, Chharodi | 78.71 | Distinction |
| 2 | MA-2 (Acharya) | NAVYA-VYAKARANA | **TRIVEDI RAHUL CHIRANJILAL**<br>Brahmarshi Sanskrit Mahavidyalaya, Nadiad | 78.67 | Distinction |
| 3 | MA-2 (Acharya) | NAVYA-VYAKARANA | **MAHETA VISHALKUMAR RAMESHCHANDRA**<br>Brahmarshi Sanskrit Mahavidyalaya, Nadiad | 77.21 | Distinction |
| 1 | MA-2 (Acharya) | PAUROHITYAM | **BHATT RAJNIKANT HARICHANDRA**<br>Aniruddhacharya Sanskrit Mahavidyalaya, Chandod | 62.79 | First Class |

| | | | | | |
|---|---|---|---|---|---|
| 2 | MA-2 (Acharya) | PAUROHITYAM | **PUROHIT JAYESHKUMAR SURESHCHANDRA**<br>Aniruddhacharya Sanskrit Mahavidyalaya, Chandod | 62.71 | First Class |
| 3 | MA-2 (Acharya) | PAUROHITYAM | **PUROHIT VIJAYKUMAR NATVARLAL**<br>Aniruddhacharya Sanskrit Mahavidyalaya, Chandod | 61.33 | First Class |
| 1 | MA-2 (Acharya) | PURANETIHASA | **RAJYAGURU SAGAR BALVANTRAY**<br>External | 74.50 | Distinction |
| 2 | MA-2 (Acharya) | PURANETIHASA | **BHOGAYTA JAYESHKUMAR SHANTILAL**<br>External | 69.58 | First Class |
| 3 | MA-2 (Acharya) | PURANETIHASA | **JOSHI CHIRAG RAMESHBHAI**<br>Narayan Sanskrit Mahavidyalaya, Petlad | 66.58 | First Class |
| 1 | MA-2 (Acharya) | RAMANUJA-VEDANTA | **INDORIYA ARUN OMPRAKASH**<br>Swaminarayan Sanskrit Mahavidyalaya, Jetalpur | 58.58 | Hi-Second Class |
| 2 | MA-2 (Acharya) | RAMANUJA-VEDANTA | **SACHINKUMAR NANDKISHOR**<br>Swaminarayan Sanskrit Mahavidyalaya, Jetalpur | 51.50 | Second Class |
| 1 | MA-2 (Acharya) | SAHITYA | **UJENIYA HINA RASIKLAL**<br>P.G. Department, S S S U, Veraval | 76.38 | Distinction |
| 2 | MA-2 (Acharya) | SAHITYA | **PANDYA NILESH PUSHPENDRAKUMAR**<br>Brahmarshi Sanskrit Mahavidyalaya, Nadiad | 72.25 | Distinction |
| 3 | MA-2 (Acharya) | SAHITYA | **JOSHI BINDESHKUMAR RAKESHBHAI**<br>Brahmarshi Sanskrit Mahavidyalaya, Nadiad | 72.21 | Distinction |
| 1 | MA-2 (Acharya) | SHUKLA-YAJURVEDA | **DAVE NITIN LABHSHANKARBHAI**<br>P.G. Department, S S S U, Veraval | 80.88 | Distinction |
| 2 | MA-2 (Acharya) | SHUKLA-YAJURVEDA | **JANI KARTIKKUMAR NANDLALBHAI**<br>P.G. Department, S S S U, Veraval | 80.75 | Distinction |
| 3 | MA-2 (Acharya) | SHUKLA-YAJURVEDA | **KALYANI HARDIK DILIPBHAI**<br>P.G. Department, S S S U, Veraval | 73.58 | Distinction |
| 1 | MA-2 (Acharya) | VASTUSHASTRA | **BHATT DIVYESHKUMAR RAJENDRAPRASAD**<br>N.S.Patel Arts Colleage, Anand | 73.33 | Distinction |
| 2 | MA-2 (Acharya) | VASTUSHASTRA | **PARMAR SANGITABEN PRATAPSINH**<br>N.S.Patel Arts Colleage, Anand | 71.00 | Distinction |
| 3 | MA-2 (Acharya) | VASTUSHASTRA | **ROHIT KRUTIKA NAGINBHAI**<br>N.S.Patel Arts Colleage, Anand | 69.33 | First Class |
| 1 | MA-2 (YOGA) | YOGA | **KARMUR MITALBEN DADUBHAI**<br>P.G. Department, S S S U, Veraval | 84.3 | Distinction |
| 2 | MA-2 (YOGA) | YOGA | **BARAIYA DRASHTIBEN JAGADISHBHAI**<br>P.G. Department, S S S U, Veraval | 79.6 | Distinction |
| 3 | MA-2 (YOGA) | YOGA | **ZALA JAYESHKUMAR BALUBHAI**<br>P.G. Department, S S S U, Veraval | 74.1 | Distinction |

## Subject Wise Toppers of Shastri Class
## Shree Somnath Sanskrit University List
## APRIL-2015

| Rank | Class | Subject | Student's Name<br>College Name | Percentage | Garde |
|---|---|---|---|---|---|
| 1 | TYBA (Shastri) | DHARMASHASTRA | **SHASTRI ABHIJIT RAMESHKUMAR**<br>Vartantu Sanskrit Mahavidyalaya, Ahmedabad | 69.80 | First Class |
| 2 | TYBA (Shastri) | DHARMASHASTRA | **RAVAL HITESH DINESHBHAI**<br>Vartantu Sanskrit Mahavidyalaya, Ahmedabad | 68.91 | First Class |
| 3 | TYBA (Shastri) | DHARMASHASTRA | **PANDYA BRIJESH DIPAKBHAI**<br>Vartantu Sanskrit Mahavidyalaya, Ahmedabad | 68.76 | First Class |
| 1 | TYBA (Shastri) | FALITA-JYOTISHA | **RAJGURU DAXESHKUMAR PRADIPBHAI**<br>Brahmarshi Sanskrit Mahavidyalaya, Nadiad | 74.04 | Distinction |
| 2 | TYBA (Shastri) | FALITA-JYOTISHA | **RAVAL YOGESHVAR KIRTIKUMAR**<br>Brahmarshi Sanskrit Mahavidyalaya, Nadiad | 70 | Distinction |
| 3 | TYBA (Shastri) | FALITA-JYOTISHA | **PANDYA RAKESHKUMAR SATISHBHAI**<br>University Sanchalit Sanskrit College, Veraval | 69.74 | First Class |

| | | | | | |
|---|---|---|---|---|---|
| 1. | TYBA (Shastri) | NAVYA-NYAYA | **TRIVEDI BHARGAV MANOJBHAI**<br>Darshanam Sanskrit Mahavidyalaya, Chharodi | 70.67 | Distinction |
| 2 | TYBA (Shastri) | NAVYA-NYAYA | **VYAS ASHISHKUMAR RAJESHKUMAR**<br>Darshanam Sanskrit Mahavidyalaya, Chharodi | 70.61 | Distinction |
| 1 | TYBA (Shastri) | NAVYA-VYAKARANA | **ODICH DHAVAL DEVRAJBHAI**<br>Aanandbava Vedant Sanskrit Mahavidyalaya, Dhorivav | 81.09 | Distinction |
| 2 | TYBA (Shastri) | NAVYA-VYAKARANA | **RAJYAGURU HITESHKUMAR NITINBHAI**<br>Aanandbava Vedant Sanskrit Mahavidyalaya, Dhorivav | 79.22 | Distinction |
| 3 | TYBA (Shastri) | NAVYA-VYAKARANA | **OZA SAMARTH VIJAYBHAI**<br>Babdeshwar Sanskrit Mahavidyalaya, Porbandar | 78.93 | Distinction |
| 1 | TYBA (Shastri) | PURANETIHASA | **BAMBHANIYA SAGAR JETHALAL**<br>University Sanchalit Sanskrit College, Veraval | 79.11 | Distinction |
| 2 | TYBA (Shastri) | PURANETIHASA | **BHATT VISHALKUMAR PRAHLADRAI**<br>University Sanchalit Sanskrit College, Veraval | 73.89 | Distinction' |
| 3 | TYBA (Shastri) | PURANETIHASA | **TRIVEDI SANDIP JEETENDRABHAI**<br>University Sanchalit Sanskrit College, Veraval | 72.24 | Distinction |
| 1 | TYBA (Shastri) | RAMANUJA-VEDANTA | **SADHU JAYSEARUPDAS KRUSNASWARUPDAS**<br>Darshanam Sanskrit Mahavidyalaya, Chharodi | 66.28 | First Class |
| 2 | TYBA (Shastri) | RAMANUJA-VEDANTA | **KHADSALIYA MAYURKUMAR DURLABHBHAI**<br>Swaminarayan Sanskrit Mahavidyalaya, Jetalpur | 58.26 | Second Class |
| 3 | TYBA (Shastri) | RAMANUJA-VEDANTA | **HALAI NARAN KUNVARJI**<br>Swaminarayan Sanskrit Mahavidyalaya, Jetalpur | 57.30 | Second Class |
| 1 | TYBA (Shastri) | SAHITYA | **PANDYA HARDIK VIJAYKUMAR**<br>Dakor Sanskrit Pathshala, Dakor | 79.37 | Distinction |
| 2 | TYBA (Shastri) | SAHITYA | **TRIVEDI MEET YOGESHBHAI**<br>Darshanam Sanskrit Mahavidyalaya, Chharodi | 76.41 | Distinction |
| 3 | TYBA (Shastri) | SAHITYA | **JOSHI YOGESHKUMAR DEVCHANDBHAI**<br>Brahmarshi Sanskrit Mahavidyalaya, Nadiad | 76.13 | Distinction |
| 1 | TYBA (Shastri) | SHUKLA-YAJURVEDA | **BHATT JIGAR MAHESHBHAI**<br>University Sanchalit Sanskrit College, Veraval | 76.70 | Distinction |
| 2 | TYBA (Shastri) | SHUKLA-YAJURVEDA | **JANI MAYURKUMAR RAJANIKANT**<br>University Sanchalit Sanskrit College, Veraval | 72.72 | Distinction |
| 3 | TYBA (Shastri) | SHUKLA-YAJURVEDA | **DAVE JAY BHARATBHAI**<br>University Sanchalit Sanskrit College, Veraval | 71.24 | Distinction |

## द्विदिवसीयाथर्ववेदविषयकराष्ट्रियसंवाहनम्

(Two-Day National Convention on Atharvaveda)




श्रीसोमनाथसंस्कृतविश्वविद्यालयेन नटपुरस्थश्रीब्रह्मर्षिसंस्कृतमहाविद्यालये अथर्ववेदविषयोपरि द्विदिवसीयराष्ट्रियसंवाहनस्यायोजनं १०/११-जून-२०१५ समभवत्।

ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य संस्थापकास्य डाह्याभाईशास्त्रिमहोदयस्य सारस्वतेन राष्ट्रियसंवाहनस्य उद्घाटनम् अभवत्। द्विदिवसीयराष्ट्रियसंवाहनस्य अभिनन्दनसमारोहे गुजरातराज्यस्य शिक्षणमन्त्रिणः माननीयाः श्रीभूपेन्द्रसिंहचुडासमामहोदयाः, विषेशातिथिरूपेण हेमचन्द्राचार्य-उत्तरगुजरातविश्वविद्यालयस्य उपकुलपतिचरः एवं उत्तरगुजरात- एज्युकेशन-सोसायटी, पाटणस्य निदेशकः श्री जे. एच्. पंचोली, अध्यक्षरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. वी.कुटुम्बशास्त्री च आसन्। सम्पूर्णस्यास्य द्विदिवसीयराष्ट्रियसंवाहनस्यायोजनं विश्वविद्यालयस्य संशोधनाधिकारी डॉ. कार्तिकपण्ड्या अकरोत्।

# संस्कृतसम्भाषणशिबिरम्-२०१५



श्रीसोमनाथसंस्कृतविश्वविद्यालये ऐषमे शैक्षिकवर्षे नूतनप्रविष्टानां छात्राणां कृते संस्कृतसम्भाषणकौशलवर्धनाय जुलैमासे एकमासात्मकं संस्कृतसम्भाषणशिबिरम् आयोजितम्। शिबिरस्य आरम्भः जुलैमासस्य षष्ठ दिनाङ्के दर्शनसङ्कायस्य अधिष्ठात्रा डॉ.जानकीशरणेन कृतम्। अस्मिन् शिबिरे पञ्चाशत् छात्राः भागमगृह्णन्। प्रतिदिनं संस्कृतसम्भाषणेन सह प्रात्यक्षिकम्, लघुनाटकम्, संस्कृतगीतम्, संस्कृतहास्यकणिका, संस्कृतक्रीडादिभिः संस्कृतसम्भाषणस्य अभ्यासः कारितः।

एकमासात्मकस्य अस्य संस्कृतसम्भाषणशिबिरस्य



समारोपसमारोहः स्वस्तिश्रीमन्मथ-आषाढकृष्ण-एकादशी-सोमवासरे १०-०८-२०१५ तमे दिनाङ्के अपराह्णे पञ्चवादने प्रभासज्योतिः इति शैक्षिकभवनस्य मुख्यसभागारकक्षे प्रावर्तत। समारोहेऽस्मिन् सारस्वतातिथिरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. अर्कनाथचौधरीमहाभागः, अध्यक्षरूपेण कार्यकारी कुलसचिवः डॉ. दशरथजादवः, विशिष्टातिथिरूपेण अनुस्नातकभवनस्य अध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रपण्ड्या च आसीत् । कार्यक्रमस्य आरम्भः वैदिक्या प्रार्थनया लौकिकमङ्गलाचरणेन सह दीपप्राकट्यपूर्वकम् अभवत्। कार्यक्रमस्य संयोजकेन डॉ.जानकीशरणेन अतिथिनां पुष्पस्तबकेन सह सर्वेषां स्वागतं कृतम्।

समारोपसमारोहममुम् उपलक्ष्य मान्यः कुलपतिश्री प्रो. अर्कनाथचौधरीमहाभागः छात्रेभ्यः सारस्वतभाषणं विदधत। महोदयेन भणितं यत् देवभाषा संस्कृतम् अद्भुतं वर्तते। अस्यां भाषायां नूतनशब्दानां सृजनस्य शक्तिर्विद्यते। अतः इयं भाषा अद्यापि सर्वभाषाणां मातृभाषारूपेण आद्रियते। संस्कृतवाङ्मये प्रवेशाय, संस्कृतभाषावबोधनाय संस्कृतसम्भाषणम् आरम्भिकं सोपानं वर्तते। अतः प्रतिवर्षम् एतादृशं शिबिरम् आयोजनीयम् । स्वकीये आध्यक्षीये उद्बोधने कार्यकारिकुलसचिवेन डॉ. दशरथजादवमहोदयेन शिबिरेऽस्मिन् भागगृहीतॄणां छात्राणां कृते अभिनन्दवचांसि भणितानि । महोदयेन उक्तं यत् संस्कृतेतरमाध्यमेन स्नातकपरीक्षाम् उत्तीर्य अस्मिन् शिबिरे एकमासात्मकं संस्कृतसम्भाषणप्रशिक्षणं सम्प्राप्य संस्कृतमाध्यमेन सम्भाषणं



कर्तुं शक्नुवन्तीति अस्माकं कृते प्रत्यक्षं वर्तते । अतः संस्कृतं प्रति च्छात्राणामुत्साहवर्धनाय एतादृशं शिबिरमायोजनीयम् । अस्मिन् समारोहे रजनीक-प्रफुल्ल-आकाशपुरोहित-मयूरजानी-पायलचावडा-वैशालीमैयड इत्यादिभिः छात्रैः संस्कृतनाटकगीतादिकं प्रस्तुतम्।

अस्मिन् संस्कृतसम्भाषणशिबिरे मुख्यशिक्षकत्वेन दर्शनविभागस्य प्राध्यापकः डॉजानकीशरणः आसीत्। सहशिक्षकत्वेन मयूरजानी, आकाशपुरोहितः, अरुणपाण्डेयः, जोषी मेहुलः इत्याद्याः छात्राः आसन्। कार्यक्रमस्यान्ते संयोजकेन डॉ जानकीशरणेन समेषां धन्यवादः विहितः।



## अध्यापकोपलब्धयः

**डॉ. शत्रुघ्नपाणिग्राही – (वेद वेदाङ्गसङ्कायाध्यक्षः एवं सहायकाचार्यः)**

- राष्ट्रियसंस्कृतसंस्थानस्य जम्मूपरिसरे १९/११/१५तः २०/११/१५ मितकाले आयोजितायां द्विदिवसीयायां राष्ट्रियवेदसंगोष्ठ्यां "वेदोक्तनैतिकता: तासां पुन: प्रवर्तनोपाया:" इत्यस्मिन् विषये शोधपत्रवाचनं कृतम्।
- उत्तरप्रदेशस्थ चौधरीचरणसिंहविश्वविद्यालये १३/११/१५ तः १९/११/१५ दिनाङ्कं यावत् आयोजिते राष्ट्रियपरिसंवादे "महाभारते उपदिष्टो विद्याग्रहणम्" इत्यस्मिन् विषये शोधपत्रस्य वाचनं तथा एकस्य सत्रस्य मुख्यवक्ता-रूपेण दायित्वनिर्वहणं कृतम्।
- श्रीसोमनाथसंस्कृतयुनिवर्सिटीद्वारा २७/०२/१५ तः २८/०२/१५ दिनाङ्कं यावत् समायोजिते राष्ट्रियपरिसंवादे "वर्तमानसामाजिकविसङ्गतिदूरीकरणे वैदिकसिद्धान्ता:" इति विषयमाधारीकृत्य शोधपत्रस्य वाचनं कृतम्।
- The Education System in Vedic Period – इति विषयमाधारीकृत्य चोक्सिमहाविद्यालये १५मार्च २०१५ तमे दिनाङ्के आयोजिते राष्ट्रियपरिसंवादे शोधपत्रवाचनं कृतम्।
- U.G.C द्वारा प्रचलित "ई पाठशाला" इति कार्यक्रमे लालबहादूरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे १४/०९/१५ तः १६/०९/१५ दिनाङ्कं पर्यन्तम् अष्टव्याख्यानानि प्रदत्तानि।
- श्रीसोमनाथसंस्कृतयुनिवर्सिटीद्वारा आयोजिते नेट/स्लेट-प्रशिक्षणकेन्द्रे व्याख्यानं प्रदानं कृतम्।
- गुजरातसर्वकारद्वारानिर्दिष्टं ccc+ इति परीक्षायां सफलता प्राप्ता।
- गुजरातविश्वविद्यालयस्य U.G.C Human Resource Development Centre मध्ये ०१/०६/२०१५ त:२१/०६/२०१५ दिनाङ्कं यावत् Refresher Course सम्पादितम्।
- "ईपीजी पाठशाला इति U.G.C. Project मध्ये वेदविषयस्य अष्टपत्राणां ई–कन्टेन्ट लेखकरूपेण कार्यनिर्वहणं कृतम्।

**डॉ. जानकीशरणदासः (दर्शनसङ्कायाध्यक्षः एवं सहायकाचार्यः)**

* शासकीय-संजयगाँधीस्मृति-स्नातकोत्तरमहाविद्यालय-गंजबसौदाद्वारा आयोजितायां राष्ट्रियसङ्गोष्ठ्यां (०१-०२ अक्टूबर, २०१५ ) "**श्रीमद्भगवद् गीता द्वारा सामाजिकसमरसता**" इति विषये पत्रवाचनं कृतम्।
* जयनारायणव्यासविश्वविद्यालयस्य संस्कृतविभागेन भारतीयसामाजिकविज्ञानानुसन्धानपरिषदा च नवम्बरमासे आयोजितायां राष्ट्रियसङ्गोष्ठ्यां "**वैदिकवाङ्मयनिरूपितजीवन्मूल्यानि**" इति विषये शोधपत्रवाचनं कृतम्।
* BASP स्वामिनारायणसंस्कृतमहाविद्यालये NRI विद्यार्थिनां कृते ०८.१२.२०१५ दिनाङ्के हिन्दूधर्मविषये व्याख्यानं प्रदत्तम्।
* Knowledge Consortium Of Gujarat इति संस्थया सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालये UGC-NET-JRF/SLET **प्रशिक्षणशिबिरस्य** सह-संयोजकस्य कार्यं कुर्वन् व्याख्यानानि अकार्षीत्।
* श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य २६.०८.२०१५ तः ०१.०९.२०१५ दिनाङ्कं यावत् प्रचलिते **संस्कृतसप्ताहोत्सवे** विभिन्नासु स्पर्धासु संयोजकत्वेन निर्णायकत्वेन च कार्यमकरोत्।
* श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य **युवमहोत्सवे** (२४.१०.२०१५ तः २६.१०.२०१५ पर्यन्तम्) विश्वविद्यालयपक्षतः छात्रग्रामस्य दलनायकत्वेन मार्गदर्शनेन सह विभिन्नासु स्पर्धासु स्पर्धा-संयोजकस्य कार्यं विहितम्।
* राज्यसर्वकारस्य निर्देशानुसारं ३०-३१ दिसम्बर तः १ जनवरी २०१६ पर्यन्तम् आयोजिते "**अङ्गनवाटिकामहिलानां प्रशिक्षणवर्गः**" इत्याख्ये संस्कृताभ्यासवर्गे संयोजकत्वेन कार्यमकरोत्।
* "**कृष्णविरचितस्वोपज्ञप्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च**" इति विषयमधिकृत्य डॉ. साधुश्रुतिप्रकाशदासमहोदयानां मार्गदर्शने शोधकार्यं विधाय १५.०१.२०१५ तमे दिनाङ्के वाक्परीक्षाञ्च सम्पाद्य विद्यावारिधिः इति उपाधिना सभाजितः।
* "**उत्तम स्वर योग रत्नावली**" इति ISBN मूल्याङ्कितस्य पुस्तकस्य व्याख्यां विलिख्य सम्पादनं प्रकाशनञ्चाकरोत्।

**प्रो. विनोदकुमारझा (व्याकरणसङ्कायाध्यक्षः)**

* Knowledge Consortium Of Gujarat इति संस्थायाः सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालये UGC-NET/SLET प्रशिक्षणवर्गे संयोजकत्वेन कार्यमकरोत्।
* विश्वविद्यालय-अनुदान-आयोग, नई दिल्ल्याः ईपीजी-पाठशाला-कार्यक्रमान्तर्गत-स्नातकोत्तर-संस्कृत-पाठ्यक्रमे षोडशपत्राणां ई-कन्टेन्ट-सज्जीकरणपरियोजनान्तर्गते समन्वयकरूपेण "व्याकरणं एवं भाषाविज्ञानम्" इति द्वितीयपत्रान्तर्गतपाठद्वयस्य निर्माणं कुर्वन् चत्वारिंशत्पाठस्य निर्माणं कारितवान्।
* अस्य महोदयस्य मार्गदर्शने ना. वैति सुब्रमण्यम् नामकशोधच्छात्रस्य **शाकटायनव्याकरणस्थसमाससूत्राणाम् अष्टाध्यायीस्थसमाससूत्रैः सह तौलनिकमध्ययनम्** इति विषयात्मकं शोधकार्यं सितम्बरमासस्य दशमे (१०) दिनाङ्के पूर्णमभवत्।

# अध्यापकोपलब्धयः

**डॉ.महेन्द्रकुमारदवे**

- विश्वविद्यालये मार्च-अप्रिलमासे आयोजिते पीएच.डी.कोर्षवर्ककार्ये व्याख्यानद्वयं दत्तम्।
- एस्.पी.युनिवर्सिटी, आणंद – वल्लभविद्यानगरे अनुस्नातकविभागे नवम्बरमासे परीक्षणं कार्यं कृतम्।
- १४/७/२०१५ तमे दिनाङ्के शिक्षणतालिमभवन-जूनागढ(डायेट)द्वारा नियोजिते बी.आर.सी.भवन-तलालानगरे प्राथमिकशिक्षकाणां संस्कृतसम्भाषणवर्गे प्रशिक्षणार्थं विशेषज्ञरूपेण कार्यं कृतम्।
- नागलपुरआर्ट्स एवं सायन्सकोलज-महेसाणा (उत्तरगुजरातयुनिवर्सिटी) द्वारा अक्टूबरमासे आयोजिते व्याख्यानमालाकार्यक्रमे व्याख्यानानि दत्तानि।
- त्रयः संशोधकाः अस्य मार्गदर्शने पीएच्.डी. पदवीं प्राप्तवन्तः।
- गुजरातसर्वकारस्य आदेशानुसारम् आयोजिते स्वच्छताभियानसंदर्भे व्याख्यानमालाकार्यक्रमे एवं च निबन्धलेखनस्पर्धायां सञ्चालनं कृतम्।
- श्री के.आर.देसाई आटर्स् एवं कोमर्स कालेज झालोदमध्ये व्याख्यानद्वयम् दत्तम्।
- साहित्य-अकादमी, नवदेहली एवं गुजरातविनयन एवं विज्ञानमहाविद्यालय-अमदाबादनगरे ''आधुनिक काव्य विद्याएँ एवं संस्कृत कविता'' इति विषयोपरि अक्टूबरमासस्य १८ तमे दिनाङ्के आयोजिते राष्ट्रियसंस्कृतपरिसंवादे शोधपत्रं प्रस्तुतम्।
- CCC+ परीक्षायां साफल्यं प्राप्तम्।

**उमाशङ्कर झा - सहायकाचार्यः ( ज्योतिषविभागे )**

- राष्ट्रियसंस्कृतसंस्थानस्य जम्मु-परिसरे नवम्बरमासे १९-२० तमे दिनाङ्के आयोजितायां राष्ट्रियसङ्गोष्ठ्यां ''Vedic Ethics and Modern Education''. इति विषये शोधपत्रवाचनं कृतम्।
- UGC – NET – JRF / SELT इति प्रशिक्षणवर्गे व्याख्यानानि प्रदत्तानि।
- ''सरदारपटेलजन्मजयन्ती'' इति पर्वणः आचरणे सहसंयोजकत्वस्य दायित्वं विहितम्।

**बी.उमा महेश्वरी – सहायकाचार्या**

- संस्कृतसप्ताहोत्सवे समूहगानस्पर्धायां संयोजिकारूपेण कार्यमकरोत्।
- संस्कृतसप्ताहोत्सवे एकाङ्किनाट्यस्पर्धायां, समूहनाटकस्पर्धायाञ्च निर्णायकत्वेन कार्यमकरोत्।
- युवमहोत्सवे दलनायिकात्वेन कार्यमकरोत्।
- CCC+ परीक्षायां साफल्यं प्राप्तम्।

**जयेशः मुंगरा - सहायकाचार्यः (Physical Education)**

- जीर्णदुर्गे समायोजिते राष्ट्रियसम्मेलने ''Effect of Yoga Training on Cholesterol and Blood Glucose'' इति विषये शोधपत्रवाचनं कृतम्।
- सौराष्ट्रविश्वविद्यालयस्य अन्तःमहिलामहाविद्यालय-बेडमिन्टनस्पर्धायां निर्णायकत्वेन कार्यमकरोत्।
- २३-२४ डिसम्बरमासे स्वर्णिमगुजरातविश्वविद्यालयेन आयोजितायां (B.P. Ed.) इति परीक्षायां परीक्षकत्वेन कार्यमकरोत्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयेन अक्टूबरमासे २४ तः २६ दिनाङ्कं यावत् भागवतविद्यापीठे समायोजिते नवमयुवमहोत्सवे सह-संयोजकत्वस्य दायित्वं निर्विहितम्।

**डॉ.पङ्कजकुमार एस् रावलः -सहायकाचार्य - ( पुराणेतिहासः)**

- ०१-०६-२०१५ तः २१-०६-२०१५ दिनाङ्कं यावत् गुजरातयुनिवर्सिटी-कर्णावत्यां 'रिफ्रेशर कोर्ष' सम्पादितम्।
- ०४-०६-२०१५ तमे दिनाङ्के प्रभासज्योतिरिति नूतनशैक्षणिकभवनस्य लोकार्पणकार्यक्रमे माननीयायाः प्रथममहिलामुख्यमन्त्रिणः आनन्दीबेनपटेलमहोदयायाः समुपस्थितौ यज्ञानुष्ठानं सभायाः सञ्चालनं च कृतम्।
- ०६-०७-२०१५ तः १२-०७-२०१५ दिनाङ्कं यावत् व्यासपदे उपविश्य श्रीमद्भागवतकथाज्ञानयज्ञे श्रीसोमनाथट्रस्टद्वारा समायोजिते मन्दिरपरिसरे कृत्वा कथायाः व्यासासने प्राप्ता दक्षिणा श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रकल्याणनिधौ प्रदत्ता।
- २०-०४-२०१५ तमे दिनाङ्के परशुरामजयन्त्युत्सवे छात्रैस्सह आचार्यपदे समूहयज्ञोपवितविवाहानुष्ठानं च सम्पादितम्।
- २३-११-२०१५ तमे दिनाङ्के विश्वविद्यालयपक्षतः श्रीसोमनाथट्रस्टद्वारा छात्रैस्सह गीतामन्दिरे गीतायाः मूलपारायणं कारितम्।

**प्रो.देवेन्द्रनाथपाण्डेयः**

- वाराणस्यां ''ज्ञानप्रवाह''अखिलभारतीयवेदसंगोष्ठयां (१८ फरवरी-२०१५) सारस्वतातिथित्त्वनिर्वाहः।
- ''वैदिकव्याख्याघटकतत्त्वानुशीलनम्'' इति विषये श्री सोमनाथसंस्कृतयुनिवर्सिटी वाक्यार्थपरिषदिव्याख्यानं दत्तम्।
- ८-९-२०१५ तमे दिनाङ्के एन.एस.पटेल-महाविद्यालये व्याख्यानं प्रदत्तम्।
- संस्कृत-सप्ताहोत्सवकार्यक्रमे सहभागिता।

**डॉ.ललितपटेलः सहायकाचार्यः**

- समसामयिकसन्दर्भे वेदोक्तनैतिकावधारणाः इति विषये १९-२०/११/२०१५ दिनाङ्कयोः राष्ट्रियसंस्कृतसंस्थानस्य जम्मूस्थश्रीरघुवीरपरिसरे प्रवर्तितायां द्विदिवसीयराष्ट्रियसङ्गोष्ठयां 'वेदेषु इष्टानिष्टसिद्धान्तः तत्समसामयिकतां च' इति विषये पत्रं प्रास्तावीत्।
- १०-११/१२/२०१५ दिनाङ्कयोः देहल्यां राष्ट्रियसंस्कृतपत्रकारितापरिसंवादे 'भावात्मिकापत्रकारिता' इति विषये शोधपत्रम् अपठत्।
- २०१५ तमस्य वर्षस्य दिसम्बरमासस्य ३ तः ५ दिनाङ्केषु कर्णावत्यां (अहमदावादे) समायोजिते अन्ताराष्ट्रियपरिसंवादे 'व्याकरणे कृषिविचारः' इति विषये शोधपत्रं प्रेषितवान्।
- १५/०९/२०१५ तमे दिनाङ्के स्वच्छताऽभियानान्तर्गतसमायोजिते कार्यक्रमे 'स्वच्छतायाः संकल्पनाः' इति विषये व्याख्याम् अकरोत्।
- सरदारपटेलजन्मजयन्तीं निमित्तीकृत्य ३०-१०-२०१५ तमे दिनाङ्के विश्वविद्यालयपरिसरे समायोजिते कार्यक्रमे 'सरदारः – भारतस्य गौरवम्' इति विषये व्याख्यानम् कृतवान्।
- UGC – NET – प्रशिक्षणे साहित्यविषये व्याख्यानम् अकरोत्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा २४-१०-२०१५ तः २६-१०-२०१५ दिनाङ्कं यावत् कर्णावत्यां समायोजिते नवमे युवमहोत्सवे संयोजकत्वेन सुचारुरूपेण दायित्वनिर्वाहम् अकरोत्।
- २६/०८/२०१५ तः ०१/०९/२०१५ दिनाङ्कं यावत् समायोजिते संस्कृतसप्ताहोत्सवे संयोजकरूपेण निर्णायकरूपेण च महनीयं योगदानम् अयच्छत्।
- 'डिप्लोमा इन संस्कृत एवं हिन्दू - रीलीजीयस स्टडिझ' इति पाठयक्रमनिर्माणे योगदानम्।
- 'सोमज्योतिः'इति विश्वविद्यालयस्य प्रातिभप्रकाशनस्य सम्पादकत्वेन योगदानम्।
- 'गृह गृहं प्रति संस्कृतम् ' इति योजनायां गीरसोमनाथजनपदे ५७०० गृहाणां सम्पर्कं कृत्वा ८००० पुस्तकानां विक्रयणम्, तत्र संयोजकत्वे कार्यम्।
- संस्कृतभारतीद्वारा २४/२५, डिसम्बर-२०१५ दिनाङ्कयोः समायोजिते गुजरातस्य प्रान्तीयाधिवेशने विश्वविद्यालयस्य पक्षतः विज्ञानगौरवप्रदर्शन्याः संयोजनं स्थापनं चाकरोत्।
- काव्यप्रकाशादिचतुर्णां सन्दर्भग्रन्थानां लेखनं प्रकाशनं च।

**डॉ.अमृतलालः भोगायता**

- षोडशतमविश्वसंस्कृतसम्मेलने २८/६/२०१५ भारतसर्वकारपक्षतः भागं गृहीत्वा ''चेतस्तरङ्गायते'' इति काव्यपाठमकरोत्।
- गुजरात-विनयन एवं विज्ञानमहाविद्यालय-अमदावादे १८/१०/२०१५ तमे दिनाङ्के ''आधुनिककाव्यसाहित्ये रा.वि.काण्डिन्य काव्यानि'' इति विषये व्याख्याने प्रदत्तम।
- वेरावलनगरस्थ आराधना होल इति स्थले श्रीमद्भगवद्गीतामाश्रित्य व्याख्यानानि प्रदत्तानि।
- स्वच्छतामहत्त्वम् एवम् श्री सरदारपटेलमहोदयस्य जीवनपरिचयः,इत्यस्मिन विषये व्याख्यानं प्रदत्तम्।
- नेट परीक्षार्थं व्याख्यानानि प्रदत्तानि।
- युवमहोत्सवे संयोजकत्वेन कार्यं कृतवान्।

## वाक्यार्थपरिषद्- २०१५-१६

"वाक्यार्थे वर्द्धते विद्या" इति वचनं पुरस्कृत्य विगतवर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिष्ठापितेयं "वाक्यार्थपरिषद्" अस्मिन् वर्षेऽपि प्रगतिपथि प्रवर्तते । वाक्यार्थपरिषदः प्रारम्भः अक्टोबरमासादभवत् । वेदवेदाङ्गसंकायस्याध्यक्ष: प्राध्यापकः डॉ. शत्रुघ्नपाणिग्राही तथा पुराणविभागस्य प्राध्यापक: डॉ. पङ्कजकुमाररावल: चलितवर्षस्य अस्याः परिषदः सञ्चालनाय संयोजकरूपेण वर्तते । तत्रोद्घाटनसमारोहस्य कार्यक्रमे मान्या: कुलपतय: प्रो.अर्कनाथचौधरीमहाभागा आध्यक्ष्यं पदमलङ्कृत्य वाक्यार्थपरिषद: द्वितीयवर्षस्य प्रथमाधिवेशने प्रथमवक्तृरूपेण " विद्यादय अर्था: द्योत्या: वाच्या: वा " इति विषयमाधारीकृत्य स्ववाक्यार्थविचारान् सम्यक् रूपेणोपस्थापितवन्त: । इयं परिषदुत्तरोत्तरं कुलपतिमहाभागानां मार्गदर्शनेन विश्वविद्यालयस्य सर्वे प्राध्यापकानां शास्त्रावगाहनेन छात्राणां विद्याविकासो निरन्तरं भवति तदस्ति अस्या: परिषद: शुभफलम् ।

## *॥ आम्बेडकरजन्मजयन्ती ॥*



*गुजरात शिक्षणविभागस्य उपसचिववर्यस्य निर्देशालोके 'प्रभासज्योतिः' इति शैक्षणिकभवने २१-१०-२०१५ तमे दिनाङ्के सायं ३-०० तः ५-०० वादनं यावत् माननीयकुलपतिमहोदयस्य अध्यक्षतायाम् आम्बेडकरजन्मजयन्तीं निमित्तीकृत्य अन्यतमः कार्यक्रमः सम्पन्नः । तत्र व्याख्यानद्वयम् अभवत् ।*

*१. आम्बेडकरः संविधानं च – प्रो. अर्चना दुबे*

*२. आयोडिन तथा तस्य लाभः – डॉ. चन्द्रकान्तपटेलः*

*मान्याः कुलपतयः डॉ. अर्कनाथचौधरीमहोदयाः अध्यक्षीयं प्रवचनम् अकार्षुः । कार्यक्रमस्यास्य संयोजनं प्रो. अर्चनादुबे कृतवती । डॉ.पङ्कजरावलः मञ्चसञ्चालनम् अकरोत् । डॉ. डी.एम्.मोकरीया अभाराभिव्यञ्जनं कृतवान् ।*

## *॥ गोलोकधाम-श्रीकृष्णचरणपादुकामन्दिरस्य भूमिपूजनप्रसङ्गः ॥*

श्रीसोमनाथट्रस्टद्वारा कार्तिकपूर्णिमायाः महोत्सवः प्रसङ्गः प्रतिवर्षं समनुष्ठीयते । वर्षेऽस्मिन् श्रीसोमनाथविन्यासस्याद्भुतसङ्कल्पः आसीद् यत् भगवता श्रीकृष्णेन यस्मात् स्थानात् स्वधामगमनलीला विहिता तस्मिन् स्थाने त्रिलोकधाममन्दिरनिर्माणस्य भगीरथकार्यं भूमिपूजनेन तस्य श्रीगणेशं भवेत् तदर्थं विन्यासेनानेन त्रिदिवसात्मकमायोजनं ''कृष्णं वन्दे जगद्गुरुम्'' इति शीर्षकेण करणीयमासीत् । अवसरेऽस्मिन् श्रीसोमनाथविन्यासेन २३/११/२०१५ तमे दिनाङ्के कार्तिकत्रयोदश्यां सोमवासरे प्रभासतीर्थसोमनाथसन्निधौ भगवतः श्रीकृष्णचन्द्रस्य महाप्रयाणप्रस्थाने श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य च्छात्रैः डॉ.पङ्कजकुमार एस्. रावलमहोदयानां मार्गदर्शने श्रीमद्भगवद्गीतायाः मूलपारायणमुच्चस्वरेण तत्स्थानैव विहितम् । हरिहरयोः कृपाप्रसादेन अनुकम्पया अनुग्रहणेन च परमभागवतस्य महाप्रयाणप्रस्थाने त्रिलोकधाममन्दिरस्य भूमिपूजावसरे श्रीसोमनाथविन्यासेन सह श्रीसोमनाथसंस्कृतविश्वविद्यालयस्यापि परस्परानुरागेण हरिहरयोर्मेलनप्रसङ्गमिव आत्मविद्यारूपायाः गीतायाः उच्चस्वरेण सामूहिकपाठेन वातावरणं दिव्यं मङ्गलमाध्यात्मिकञ्च जातम् । पाठान्ते प्रसादं गृहीत्वा धन्यतामनुभूय भगवतचरणयोर्कार्तज्ञं विनिवेद्य च्छात्रप्राध्यापकाः स्वस्वभवनमगच्छन् ।

## *सरदारवल्लभभाईपटेलजन्मजयन्ती*



३०/१०/२०१५ तमे दिनाङ्के विश्वविद्यालयस्य सभाखण्डे सरदारवल्लभभाईपटेलजन्मोत्सवस्य आयोजनम् अभवत् । कार्यक्रमेऽस्मिन् प्रथमं निबन्धस्पर्धायाः आयोजनमभूत् । अस्यां स्पर्धायां आचार्य- प्रथवर्षीयच्छात्रः राकेशः प्रथमस्थानम् अलभत । अपराह्णे आयोजिते व्याख्यानसत्रे अनुस्नातकविभागस्य अध्यक्षवर्येण प्रो.देवेन्द्रनाथपाण्डेयमहोदयेन अध्यक्षीयं स्थानम् अलङ्कृतम् । साहित्यविभागे सहायकाचार्यः डॉ.डी.एम्.मोकरीया सर्वान् स्वागतीकृत्य कार्यक्रमस्यास्य सञ्चानलमकरोत् । आयोजितेऽस्मिन् सत्रे मुख्यवक्तारौ डॉ.अमृतलालभोगायता-ललितपटेलौ 'सरदारवल्लभपटेलः राष्ट्रस्य गौरवम्' इति विषयोपरि स्वव्याख्यानम् अकुरुताम् । प्राचार्यनरेन्द्रपण्ड्यामहोदयैः कृतज्ञता प्रकटिता । अस्य सम्पूर्णकार्यक्रमस्य डॉ. डी.एम्.मोकरीया एवं श्रीउमाशंकरझा संयोजनम् अकुरुताम् ।



## विद्यावारिधिशोधचर्चासमितिः (R.D.C. of Ph.D.)

विश्वविद्यालयानुदानायोगस्य (U . G . C . ) नियमानुसारं श्रीसोमनाथसंस्कृत विश्वविद्यालयेन २०१४ - १५ इति शैक्षणिकवर्षस्य कृते विद्यावारिधिप्रवेशपरीक्षायाः आयोजनं कृतम् । विद्यावारिधिप्रवेशपरीक्षार्थं अष्टसप्ततिः (७८) शोधार्थिनः पञ्जीकरणं कृतवन्तः । तेषां पञ्चविंशतिः(२५) शोधार्थिनः उत्तीर्णा: जाताः । २०१२ - १३ एवं २०१३ - १४ शैक्षणिकवर्षयोः द्वाविंशतिः (२२) शोधार्थिनां तथा २०१४-१५ शैक्षणिकवर्षस्य पञ्चविंशतिः (२५) शोधार्थिनां आहत्य सप्तचत्वारिंशत् (४७) शोधार्थिनां कृते विद्यावारिधिकार्यशालायाः (Ph.D.Coursework) आयोजनं सञ्जातम् । तदनन्तरं तेषां शोधार्थिनां कृते शोधचर्चासमितेः (Research Discussion Committee) आयोजनं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे २४/०९/२०१५ तमे दिनाङ्के सञ्जातम् । तत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्याः कुलपतयः प्रो. अर्कनाथचौधरीमहाभागाः समितेः आध्यक्ष्यं अलङ्कृतवन्तः । तत्र प्रो. रमाकान्तपाण्डेयः, प्रो. ललितकुमारत्रिपाठी चापि विषयनिष्णातरूपेण ।

# શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી

(ગુજરાત સરકારશ્રી દ્વારા સ્થાપિત તથા યુ.જી.સી. દ્વારા માન્ય)

પ્રવેશ શરૂ
નિઃશુલ્ક ભોજન અને રહેવાની વ્યવસ્થા

## અભ્યાસક્રમની પ્રવેશ યોગ્યતા, વિષય અને સમયગાળો

| ક્રમ | ડીગ્રી | વિષય | પ્રવેશ યોગ્યતા | સમયગાળો |
|---|---|---|---|---|
| ૧ | **વિદ્યાવારિધિ** (Ph. D.) | સાહિત્ય, વેદ, પુરાણ, જ્યોતિષ, વાસ્તુ, પૌરોહિત્ય, ન્યાય, સર્વદર્શન, વ્યાકરણ, મીમાંસા, ધર્મશાસ્ત્ર | ૫૫ % સાથે સંસ્કૃત વિષયમાં આચાર્ય (M. A.) | --- |
| ૨ | **તત્ત્વાચાર્ય** (M. Phil.) | સાહિત્ય, વેદ, પુરાણ, જ્યોતિષ, વાસ્તુ, પૌરોહિત્ય, ન્યાય, સર્વદર્શન, વ્યાકરણ, મીમાંસા, ધર્મશાસ્ત્ર | સંસ્કૃત વિષયમાં આચાર્ય (M. A.) | ૧ વર્ષ |
| ૩ | **આચાર્ય** (M. A.) (અનુસ્નાતક) | સાહિત્ય, વેદ, પુરાણ, જ્યોતિષ, વાસ્તુ, પૌરોહિત્ય, ન્યાય, સર્વદર્શન, વ્યાકરણ, યોગ | સંસ્કૃત વિષય સાથે સ્નાતક | ૨ વર્ષ |
| ૪ | **પી. જી. ડી. સી. એ.** | કોમ્પ્યુટર | કોઈપણ વિષયમાં સ્નાતક | ૧ વર્ષ |
| ૫ | **શિક્ષાશાસ્ત્રી** (B.Ed.) | સંસ્કૃત | કોઈપણ વિષયમાં સ્નાતક | ૨ વર્ષ |
| ૬ | **શાસ્ત્રી** (B.A.) (સ્નાતક) | સાહિત્ય, વેદ, પુરાણ, જ્યોતિષ, વાસ્તુ, પૌરોહિત્ય, ન્યાય, સર્વદર્શન, વ્યાકરણ | કોઈપણ પ્રવાહમાં ધો. ૧૨ પાસ | ૩ વર્ષ |
| ૭ | **ડિપ્લોમા** (પદવિકા) | યોગ, મંદિર વ્યવસ્થાપન, જ્યોતિષ, વાસ્તુ, કર્મકાંડ, સંસ્કૃત સંભાષણ, વૈદિક ગણિત, સંગીત | ધો. ૧૨ પાસ | ૧ વર્ષ |
| ૮ | **સર્ટિફિકેટ** (પ્રમાણપત્ર) | યોગ, કર્મકાંડ, વૈદિક ગણિત, સંગીત | ધો. ૧૦ પાસ | ૬ માસ |

## વિશ્વવિદ્યાલય પરિસરમાં

- સંસ્કૃત વિષયના નિષ્ણાત અધ્યાપકો દ્વારા અધ્યાપન કરાવવામાં આવે છે.
- સંસ્કૃત ભાષા બોલવા, લખવાની તાલીમ (સંસ્કૃત સંભાષણ) આપવામાં આવે છે. વિદ્યાસાધના અને સિદ્ધિ માટે સંસ્કૃતને લગતા રાજ્યસ્તરીય અને રાષ્ટ્રીય સેમિનારોનો લાભ મળી શકે છે. સંસ્કૃતમાં વક્તૃત્વ, સ્તોત્રગાન, ગીતા-ઉપનિષદ્-ભાગવત શ્લોકગાન જેવી વિવિધ સ્પર્ધાઓ દ્વારા વાચિક/લેખિક અભિવ્યક્તિની તાલીમ આપવામાં આવે છે.
- સ્નાતક અને અનુસ્નાતક કક્ષાએ ચોઇસ બેઇઝ્ડ ક્રેડિટ સિસ્ટમ (C.B.C.S.) અને સેમેસ્ટર પદ્ધતિનો અમલ કરવામાં આવેલ છે.
- સ્નાતક કક્ષાએ ફરજિયાત વિષયના રૂપમાં અંગ્રેજી અને કોમ્પ્યુટરનું શિક્ષણ આપવામાં આવે છે, જે માટે અદ્યતન કમ્પ્યુટર લેબની વ્યવસ્થા.
- યુનિવર્સિટી ખાતે સમૃદ્ધ પુસ્તકાલયની વ્યવસ્થા છે.
- ઈન્ડોર અને આઉટડોર ગેમ માટેના રમત-ગમતના સાધનોની વ્યવસ્થા તથા વિશાળ મેદાન ઉપલબ્ધ છે.
- બહારના વિદ્યાર્થીઓ માટે યુનિવર્સિટી દ્વારા રહેવા અને જમવા માટેની નિઃશુલ્ક વ્યવસ્થા કરવામાં આવી છે.
- એમ.ફિલ. અને પીએચ.ડી. માટે વખતો-વખત પ્રવેશ માટેની જાહેરાત આપવામાં આવે છે. યુનિવર્સિટી કક્ષાએ આયોજિત પ્રવેશ પરીક્ષા દ્વારા આ બંને અભ્યાસક્રમોમાં પ્રવેશ આપવામાં આવે છે.
- પાણ્ડુલિપિ-વિજ્ઞાન અને પાઠસંપાદનનું શિક્ષણ પણ આપવામાં આવે છે.

**વધુ માહિતી અને પ્રવેશ અંગેની પૂછપરછ માટે નીચેના નંબર પર સંપર્ક કરવો.**

(૧) ડૉ. મહેન્દ્રકુમાર દવે - મો. ૯૮૯૮૪ ૭૮૪૭૨
(૨) ડૉ. લલિત પટેલ - મો. ૯૮૭૯૮ ૩૪૦૭૧
૯૪૨૯૭ ૭૧૧૬૦
(૩) ડૉ. દીપેશ કતિરા - મો. ૯૫૯૪૩ ૫૬૮૫૭
(૪) ડૉ. જાનકીશરણ - મો. ૮૭૫૮૮ ૧૭૫૨૫
(૫) ડૉ. અમૃતલાલ ભોગાયતા - મો. ૯૪૨૬૩ ૮૨૮૬૬
ઈ-મેઈલઃ sssu.veraval@gmail.com
વેબસાઈટઃ www.shreesomnathsanskrituniversity.info



"શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી વ્યક્તિઓને નહીં, પરંતુ આખે આખી પેઢીને તૈયાર કરશે, અહીંથી પેઢીઓનું નિર્માણ થશે. આ યુનિવર્સિટી માનવની વાવણી માટેના એક મહાન અભિયાનનો પ્રારંભ છે."

**– શ્રી નરેન્દ્ર મોદી**